United International Journal of Multidisciplinary Research
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

# अभ्युदयकविमण्डलसारथिः दाशरथिः

**आचार्य पि. वरप्रसादमूर्तिः,** संस्कृताचार्यः, तेलुगु & प्राच्यभाषाविभागः,
आचार्य नागार्जुनविश्वविद्यालयः, नागार्जुननगरम्, गुण्टूरु, आन्ध्रप्रदेशः

**आमुखम् :**

**"जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।**
**नास्ति येषां यशःकाये जरामरणजं भयम्" ।।** इति ।

अथ काकिनाडनगरस्थपिठापुरराजकलाशालायां तेलुगु-हिन्दी-संस्कृतविभागैः प्रमुखतेलुगुकविपुङ्गवस्य दाशरथेः शतजयन्त्युत्सववर्षं पुरस्कृत्य 2024 वर्षस्य दिशम्बर्मासि षोडशदिनाङ्के इन्दुवासरे एकदिवसीया राष्ट्रियविद्वत्संगोष्ठी समायोज्यते इति भूयान् आनन्दावसरः समेषां तेलुगुपठितृजनानाम् । शुभे शोभनेऽवसरेऽस्मिन् कुञ्जिकाभाषणं प्रदातुं माम् आहूतवद्भ्यः कलाशालायाः प्राचार्यवर्येभ्यः डॉ. वि.वि. तिरुपाण्यम्महाशयेभ्यः धन्यवादान् समर्पयामि ।

असौ दाशरथिकविवरस्तावत् क्रिस्तोः परं 1925 तमे वर्षे तेलङ्गाणप्रान्तगते श्रीवैष्णवसंप्रदायबद्धपरिवारे लब्धजन्मा प्राथमिकपाठशालास्तरतः उन्नतपाठशालास्तरं यावत् उर्दूमाध्यमेन विद्यामधिगम्य स्वपितुः सकाशात् देवभाषां च संस्कृतमधीतवान् ।

**दाशरथिकविपुङ्गवेन संप्राप्ताः पुरस्कारविशेषाः**

'कवितापुष्पकम्' इत्यस्याः कवितारचनायाः कृते आन्ध्रप्रदेशसर्वकारीयसाहित्याकाडमीपुरस्कारेण, 'तिमिरन्तो समरम्' इत्यस्य कृतिविशेषस्य केन्द्रीयसाहित्याकाडमीपुरस्कारेण, 'गालिब्गीतालु' इत्यस्याः रचनायाः आन्ध्रप्रदेशसर्वकारीयैः उत्तमानुवादपुरस्कारेण च दाशरथिकविपुङ्गवः सत्कृतः । किञ्च आन्ध्रप्रदेशसर्वकारीयैः नितरां प्रतिष्ठात्मके आन्ध्रप्रदेशास्थानकविपदे अभिषिक्तः कविवरोऽयम् ।

कवितासृजनविषये दाशरथिकवितल्लजस्य उद्घोषणा -

"कान् पठितृजनान् उद्दिश्य, किं वा प्रयोजनं साधयितुं कविताः समालिख्यन्ते" इत्यस्मिन् विषये दाशरथिकविवरेण सुस्पष्टं समुद्घोषितम् अस्यां कवितायाम् -

**"प्रभाताल सन्देशालनु मोसुकोच्चे**
**प्रत्यूषवार्ताहरुण्णि नेनु,**
**कान्तिसङ्केतधरुण्णि नेनु,**
**अन्धकारनिः शब्दारण्याललो**
**आरनि कागडालतो नडिचे कविनि नेनु,**
**नन्दनारामंलोनि मन्दारालु**
**सुन्दरोद्योनंलोनि गुलाबीलु**
**ना अतिनव्यलेखिनिकि सङ्गतालु**
**ना अभिनवचेतनकु प्रतीकलु**
**ना जातिलो चैतन्यं कलिगिंचटानिकि**
**ना जातिनि जागृतितो वेलिगिंचटानिकि**
**ब्रास्तुन्नानु कवित्वान्नि**
**विनिपिस्तुन्नानु कविताध्वनिनि,**
**कलाकौशलान्नि कापाडटं कोसं**
**रम्यभावाल निषातो रापाडटं कोसं**
**ना जीवनाडिनुण्डि कवितामधुवुनु**
**पिण्डि ना जातिकि अन्दिस्तानु"**[1] इति ।

पौराणां हृदयेषु चैतन्यपूरणमेव स्वककवितायाः परमं लक्ष्यमिति सम्यक्तया दाशरथिः उद्घोषितवान् ।

अथ तेलुगुसाहित्यस्य आधुनिकविमर्शकाग्रणीस्तत्रभावान् डॉ.जी.वि. सुब्रह्मण्यम्महाशयस्तु एवम् अभिप्रैति "आधुनिकान्ध्रसाहित्यक्षेत्रं तु तिसृभिःधाराभिः प्रवहदासीत् । तत्रादिमा तु संप्रदायचैतन्यधारा; तद्धारायाः आदर्शनेता कविसम्राट्विश्वनाथसत्यनारायणमहाशयः व्यराजत । द्वितीयधारा तावत् सायुधविप्लवचैतन्यधारा यस्याः नायकः महाकविः श्रीश्रीमहाभागः । तृतीयधारा

तु शान्तिविप्लवचैतन्यधारा ; यस्याः अधिपतिः महाकविदाशरथिः । इति । आचार्य जी.वि. सुब्रह्मण्यम्महाशयस्य विश्लेषणम् अर्थपूर्ण भासते ।

वस्तुतस्तु दाशरथिकविपुङ्गवः शान्तिविप्लव चैतन्यरथसारथिरासीत् ।

**"श्रमजीवुलमेलेञ्चि**
**दमननीतिनेदिरिञ्चि**
**अनुक्षणं पोराडे**
**अनेकयुवनायकुलु**
**आकसान एगरेसिन**
**विप्लवनवपताकलिवि**
**विजयानिकि राकलिवि"**(2) इति ।

एवं कविताधाराभिः सर्वदा राष्ट्रतरुणान् प्रेरयतिस्म दाशरथिमहाकविः ।

विप्लवस्वरूपं पठितृभ्यः विशदीकरोति दाशरथिकविवरः –

**"नवचैतन्यं पोंगे**
**युवकुलार ! मितृलार !**
**हिंस नेर्वकण्डि मीरु**
**ध्वंसं काबोकण्डि**
**मेधाविकसनमुनकै**
**मेटिकृषिनि चेयण्डि**
**प्रजलसमस्यलनु तेलिसि**
**प्रवर्तिंचदलचण्डि**
**एदो ओक देशंलो**
**एपुडो एदो अयिते**
**अलागे मनदेशंलो**
**अवालनि अनकण्डि**

**समसिन्दि पातदनम्**
**क्षणक्षणं क्रोत्तदनम्,**
**पातप्रपञ्चं वैपु**
**परुगुतीय दलचकण्डि**
**विप्लवमंटे मृत्युवु**
**विलयताण्डवं कादु,**
**विप्लवमंटे बाम्बुल**
**विकाटाट्टहासं कादु**
**विप्लवमंटे रक्तं**
**वेदजल्लटं कादर्रा !**
**पीन्गुल गुहलनुंडि**
**विप्लवालु रावरो !**
**प्रजलनु मेल्कोल्पालि**
**निजमेदो तेल्पालि,**
**हृदयाल्लो विप्लवालु**
**एदगालि"** (3)

इति विप्लवे नूतनं पन्थानमाश्रित्य शान्तिं कामयते स्म। अभ्युदयो भवतु, विप्लवं वा भवतु हिंसामार्ग विना, शान्तिमार्गेण अग्रे गच्छन् विश्वश्रेयसे यतेत इति मन्यते दाशरथिकविसार्वभौमः ।

किञ्च मानवप्रगतये आलम्बनभूतं विज्ञानञ्च समाजाभिवृद्धिं साधयितुं साधनं भवेत् ।

**"पिच्चिवाडु अणुवुनु आयुधंगा वाडुताडु**
**मञ्चिवाडु अणुवुनु नेस्तंगा मलचगलडु ।"**(4) इति

इति आधुनिकविज्ञानेन उभयविधं कार्यं साधयितुं शक्यते इत्युद्बोधयति दाशरथिकविवृषभः । उन्मत्तस्तु अणुपदार्थम् आयुधरूपेणोपयुङ्क्ते; परं सज्जनस्तु अणुपदार्थं समाजहिताय प्रयुङ्कते इति उन्मत्त सज्जनयोरन्तरं सम्यक्तया ज्ञापयति कविराजः दाशरथिः ।

**United International Journal of Multidisciplinary Research**
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

**दाशरथिकवितासु साम्यवादः**

दाशरथिकविराजस्तु सर्वदा सर्वमानवसौभ्रातृत्वम् अभिलषति स्म । अद्यतन प्रजातन्त्रे साम्यवादः कथं साधनीयः, कथम् उद्यमः प्रचालनीयः इति सुष्ठु मार्गं निर्दिशति -

**"प्रजास्वाम्यमनि साम्यवादमनि**
**वल्लिस्तेने चालदु**
**वाग्दानाल्तो निनादालतो**
**स्वर्गं नेलकु वालदु**
**अस्तव्यस्त आर्थिकव्यवस्थ**
**मारकपोते मनिषिकि अवस्थ**
**आपदलेमो अन्दरिका ?**
**सम्पदलेमो कोन्दरिका ?**
**साम्यवादसाधनकोसं**
**श्रामिकवर्गं कदलालि**
**युवतीयुवकुलु ई समरंलो**
**नवनायकुलै निलवालि**
**वर्गभेदमु, निरुद्योगमु**

**परपीडनमु पोवालि**
**धनस्वाम्यमु मुर्दाबाद् !** [5] इति

साम्यवादभावाः पठितृभिः गोचरीक्रियन्ते ।

**"ना पेरु प्रजाकोटि,**
**ना ऊरु प्रजावाटि"**

इति ससन्तोषम् उद्घोषयति दाशरथिः ।

**"अनादिगा सागुतोन्दि - अनन्तसंग्रामम्**

**अनाधुनिकी आगर्भ - श्रीनाथुनिकीमध्य ।"**[6]

इति कथने एव दाशरथिकविपुङ्गवस्य साम्यवाददृक्पथं स्फुटमवगम्यते ।

श्रामिकवर्गपक्षं वहन् दाशरथिकविवृषभः "रुद्रवीण" नामिकायां कवितायाम् उद्घोषयति -

**"रानुन्नदि येदि निजम् - अदि वोकटे सोषलिजम्**
**कलपण्डोय् बुजं बुजं - कदलण्डोय् गजं गजम्**
**अड्गड्गुन येडदनेत्तुरु - मड्गुलुगा विडवन्डोय्**
**पडिपोयिन गुडिगोडलु - विडिचिपेट्टि नडवन्डोय्"**[7] इति

**दाशरथिकवितासु तात्त्विकभावा :**

उर्दू - पारशीभाषाध्यनप्रभावात् दाशरथिमहाशयेन विरचितायां 'रुबायी' नामिकायां कविताप्रक्रियायां तात्त्विकभावाः दृग्गोचरीक्रियन्ते । 'रुबा' इत्युक्तौ अरबीभाषायां तु 'चत्वारि' इत्यर्थः । 'रुबायी' संज्ञिकायां कविताप्रक्रियायां पंक्तिचतुष्टयं स्यात् । एतदर्थं कतिपयच्छन्दोनियमाः पालनीयाः। तत्र प्रास, अनुप्रासादिनियमाः अवश्यमनुसर्तव्याः । यथा-

**"चच्चि ब्रतिकियुन्नवारु कोन्दरु कलरु**
**व्रतिकिचच्चिनद्विवारु एन्दरो कलरु**
**एन्तेन्तो वेदान्तं वल्लिंचेरु**
**मृतिकि जडियबोनिवारु एन्दरु कलरु ?**
**निर्भयंगा वच्चानु, निर्भयंगा वेलतानु**
**मृत्युवु नृत्यं चूपि जडिपिस्तारेन्दुकनि ?**
**भयमेन्दुकु ? ना इन्टिकि ने वेलतानु"**
**ऊपिरि पील्चिनप्पुडेमो - जननम्**
**ऊपिरि विडिचिनप्पुडेमो - मरणम्**
**जनन-मरणालमध्यलो दूरम्**
**क्षणम् - अन्नमाट तेलुसुकोवटं कठिनम् ।"**[8] इति

इत्थं "जातस्य हि ध्रुवो मृत्युः" इति भगवद्गीतावचनसारं, जीवनपरमार्थं, तात्त्विकसत्यम् अल्पैः पदैः अनल्पम् अर्थं बोधयति दाशरथिमहाकविः ।

एवं दाशरथिकवीश्वरः एकस्य वादस्य, एकस्याः एव कविताप्रक्रियायाः नेतृत्वं, प्रातिनिध्यं वा नावहत् : स्वजीवनकाले सुप्रथितासु नैकविधसाहित्यप्रक्रियासु कृतभूरिपरिश्रमः अपारं कवितावाङ्गयं सृष्टवान् ।

**"इन्नि शताब्दालु प्रयाणं चेसिना**
**इक्कडे वुन्नाम् ई ऊरिपोलिमेरपक्कन**
**डार्विन् बयालजीलो परिणामालपट्टिक**
**पदियोजनालन्तवुन्ना**
**मानवुडु मानवुडय्ये कालान्नि**
**निर्देशिंचगल प्रदेशं कानरादु ।"**(9) इति ।

एवं मानवतावादः महोन्नतवादः, विज्ञानार्जनमेव साहित्यस्य परमं लक्ष्यमिति प्राकटयत् श्रीमान् दाशरथिकृष्णमाचार्यकविमूर्धन्यः ।

**उपसंहारः**

"विश्वश्रेयः काव्यम्" इति आदिकविनन्नयभट्टारकस्य सूत्रं सत्यापयन् सार्वकालिकं सार्वजनीनञ्च साहित्यं तेलुगुभाषायां सृष्टवान् दाशरथिकविपुङ्गवः । स तु धन्यः तेन कविवरेण धन्येयं तेलुगुवाणी । तदुक्तं शताधिकग्रन्थकर्त्रा तत्रभवता अप्पयदीक्षितवर्येण -

**"आन्ध्रत्वमान्ध्रभाषा च नाल्पस्य तपसः फलम् ।"** इति ।

किञ्च

**"अपारे काव्यसंसारे कविरेव प्रजापतिः ।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते ।।"** इति ।

United International Journal of Multidisciplinary Research
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

**परामृष्टकाव्यसूची**

(1) द्र. दाशरथिः - ज्वालालेखिनि - कवितन सम्पद

(2) द्र. दाशरथिः - आलोचनालोचनालु - एर्रटि नव्वुलु

(3) द्र. दाशरथिः - आलोचनालोचनालु - येदि विप्लवम् ?

(4) द्र. दाशरथिः - आलोचनालोचनालु - अणुगीतम्

(5) द्र. दाशरथिः - आलोचनालोचनालु - भद्रतलेनि पट्टभद्रुडु

(6) द्र. दाशरथिः - रुद्रवीण - अनन्तसंग्रामम्

(7) द्र. दाशरथिः - रुद्रवीण - रानुन्नदि

(8) द्र. दाशरथिः - ज्वालालेखिनि

(9) द्र. दाशरथिः - मस्तिष्कम्लो लेबोरेटरी